## राष्ट्रिय-संस्कृत-संस्थानम्
## श्रीरणवीरपरिसरः, कोट-भलवालः, जम्मूः, जम्मूकाश्मीरम्- 181122

### दिवसद्वयव्यापिनी राष्ट्रियसङ्गोष्ठी- 27-28 फरवरी 2020

वेदः सर्वज्ञानमयः। स एव सर्वासां विद्यानां मूल उत्सः। दिव्यतमसत्ताया विविधरूपाणां भव्यस्तुतिरेवर्चां प्रमुखप्रतिपाद्यविषयः। निखिलाम्नायवचसां परमं तात्पर्यं धर्मब्रह्मणी। ब्रह्मसाक्षात्कार एव वस्तुतो धर्मस्यापि परमपर्यवसानम्। तत्परम्ब्रह्मैवेन्द्रमित्रवरुणादिरूपैरात्मानमभिव्यनक्ति। तस्य ब्रह्मतत्त्वस्यैवैकमभिधानं शिव इति बहुधा श्रूयते। वैदिकवाङ्मये स एव शिवः 'रुद्र' इत्यभिधानेनाधिकं प्रसिद्धः।

काश्मीरशैवदर्शनं शिवस्य पारम्यं स्वीकुर्वाणमद्भुतं दर्शनमस्ति। सोमानन्दोत्पलदेवाभिनवगुप्तादय आचार्याः स्वकीयानुपमग्रन्थरत्नद्वारामुं राद्धान्तमुपबृंहितवन्तः। अभिनवगुप्तप्रशैवसिद्धान्तानां पुष्ट्यर्थं वैदिकोद्धरणानि भृशमुपयुयुजे। वैदिकसिद्धान्तस्य काश्मीरशैवदर्शनस्य परम्पराधारे शारदादेशे युगपत् प्रवहन्त्यौ अद्ययावत् नैजाविच्छिन्नतां दधाते।

एतत्तथ्यमवधाय राष्ट्रियसंस्कृतसंस्थानस्य जम्मूनगरस्थः श्रीरणवीरपरिसरः **"वैदिकवाङ्मये काश्मीरशैवदर्शनपरम्परायाञ्च शिवतत्त्वम्"** इति विषयमवलम्ब्यैकां दिवसद्वयव्यापिनीं (27-28 फरवरी 2020) राष्ट्रियसंगोष्ठीम् अनुष्ठास्यन्नस्ति। सन्दर्भेऽस्मिन् निम्नलिखितबिन्दुषु शोधपत्राण्यामन्त्र्यन्ते-

- **वैदिकसंहितासु शिवतत्त्वम्।**
- **ब्राह्मणग्रन्थेष्वारण्यकग्रन्थेषु च शिवतत्त्वम्।**
- **उपनिषत्सु शिवतत्त्वम्।**
- **वैदिकयागेषु शिवतत्त्वम्।**
- **रामायणे महाभारते च शिवतत्त्वम्।**
- **काश्मीरशैवागमसम्मतं शिवतत्त्वम्।**
- **काश्मीरशैवदर्शनग्रन्थेषु शिवतत्त्वम्।**
- **काश्मीरशैवस्तोत्रेषु शिवतत्त्वम्।**

### आवश्यकनिर्देशाः-

1. ई-मेलद्वारा पूर्णशोधपत्रप्रेषणस्य अन्तिमा तितिः 21/01/2020. (E-mail- vedaneeti@gmail.com)
2. निर्णायकसमित्या चितानां शोधपत्राणां स्वीकृतिसूचना ई-मेलद्वारा 27/01/2020 यावद् दास्यते।
3. शोधपत्रं पञ्चभ्यः पृष्ठेभ्यो न्यूनं दशभ्यः पृष्ठेभ्योऽधिकन्न स्यात्।
4. शोधपत्रं संस्कृतभाषया, हिन्दीभाषया आङ्ग्लभाषया वा निबद्धं स्यात्।
5. शोधपत्रं यूनिकोड/कृतिदेव/चाणक्य इत्येतेषामन्यतमतन्त्रांशे (12/14 अक्षराकारे) उट्टङ्कितं स्यात्।
6. संगोष्ठ्यां प्रस्तुतानां शोधपत्राणां प्रकाशनम् अनुपदमेव करिष्यते।
7. आवासभोजनादिव्यवस्था संगोष्ठ्यवध्यनुरोधेन परिसरेण करिष्यते।

*संगोष्ठ्यां भागग्रहणाय विद्वद्भ्यो द्वितीयश्रेणीवातानुकूलितरेलयात्राव्ययः (A/C 2nd Class) शोधच्छात्रेभ्यश्च शयनयानरेलयात्राव्ययो (Sleeper Class) यात्राप्रमाणपत्रप्रस्तुतौ प्रदास्यते।

संयोजकः

M.K

प्रो. मनोजकुमारमिश्रः
(वेदविभागाध्यक्षः)

निवेदकः

वासुदेव शर्मा

प्रो. वासुदेवशर्मा
(प्राचार्यः)